# TirthKshetra Kurukshetra

AUTHOR NAME : Dr.Manasi Ratha

DESIGNATION : Lecture in Dharma Shastra,At : Bagdevi Sanskrit College,Daliji,Kendrapara,Odisha

ABSTRACT

सप्तदशशतके विरचितस्य तालपत्रमातृकारूपेण च जीर्णशीर्णरूपेण विधमानस्य ग्रन्थरत्नस्यास्य प्रकाशनेन नन्दमहोदय: सुधीसमाजस्य न केवलं श्रद्धाभाजनं भवति, अपितु उत्कलीयधर्मशास्त्रभाण्डागारमपि पुष्कली करोति ।। क्षेत्रस्यास्य विषये अथर्ववेदे शतपथब्राह्मणे तैतरीयब्राह्मणे मैत्रायणीसंहितायामुल्लेखो विद्यते । ऋग् वेदेपि क्षेत्रस्यास्य विषये उल्लेख: विद्यते ।छान्दोग्योपनिषदि उषस्ति चाक्रायणस्तु कथाप्रसङ्गे कुरुक्षेत्रस्योल्लेख: आयाति ।अर्वाचीन: चीनपरिव्राजकहुएन्सांमहांदयोपि अस्य क्षेत्रस्य विषयं चर्चा कृतवान् ।

---

पुण्यक्षेत्रेषु कुरुक्षेत्रमन्यतमम् । अस्माभि: नित्यकर्मप्रसङ्गे क्षेत्रस्यास्योच्चारणं प्रत्यहं क्रियते । तद्वचनं यथा-

"गङ्गे च यमुने चैव गेदावरिसरस्वती ।

नर्मदे सिन्धु कावेरी जलेस्मिन् सन्निधिं कुरु।।"

"कुरुक्षेत्र गया गङ्गा प्रभासे दुर्गमे तथा ।

संग्रामे सर्वकार्येस्मिन् विघ्नस्तस्य न जायते ।।"

क्षेत्रस्यास्य विषये अथर्ववेदे शतपथब्राह्मणे तैतरीयब्राह्मणे मैत्रायणीसंहितायामुल्लेखो विद्यते । ऋग् वेदेपि क्षेत्रस्यास्य विषये उल्लेख: विद्यते । वैदिककाले ब्राह्मणकाले च वैदिकसंस्कृत्या: मूलकेन्द्रमासीत् कुरुक्षेत्रम् । आश्वलायन-लाट्यायन-कात्यायन-श्रौतसूत्रेषु ताड्यब्राह्मणे च उल्लेख दृश्यते यत् अस्मिन् क्षेत्रे बहुनां विशिष्टसत्राणामनुष्ठानं जातम् । छान्दोग्योपनिषदि उषस्ति चाक्रायणस्तु कथाप्रसङ्गे कुरुक्षेत्रस्योल्लेख: आयाति । प्रप्रथमधर्मशास्त्रकारणं भगवता मनुना कुरुक्षेत्रस्य विषये उल्लेख: कृत: । तत: क्षेत्रस्यास्य बहुप्राचीनकालात् सुतरां प्राधान्यं विद्यत एव । कुरुक्षेत्रं भगवत: ब्रह्मण: यज्ञवेदी भवति । पर्शुरामकाले क्षेत्रमिदं समन्तपञ्चकमिति नाम्ना अभिहितम् आसीत् । परवर्तिकाले क्षेत्रस्यास्य नाम महाराजसाम्बरणस्य पुत्र कुरुनामानुसारं कुरुक्षेत्रमिति सञ्जातम् । उच्यते च वामनपुराणे-

"आद्यैषा ब्राह्मणो वेदीस्ततो रामह्रदा: स्मृता: ।

पुरुणा च यत: कृष्णं कुरुक्षेत्रं ततस्स्मृतम् ।।"

विष्णुपुराणानुसारं य इदं धर्मक्षेत्रं चकार । धर्मक्षेत्रनिमित्तं महाराजकुरुणा इन्द्रं वरं ययाच यत्-इदं क्षेत्रं धर्मक्षेत्रं भवतु अत्र य: स्नानं करोति अथवा मरणं प्राप्नोति स जन: महापुण्यफलं प्राप्स्यति । वामनपुराणे वचनमिदं प्राप्यते यत्-

"यावदेतं मया कृष्णं धर्मक्षेत्रं तदस्तु व: ।

स्नातानाञ्च मृतानाञ्च महापुण्यफलं त्विह ।।"

कुरुक्षेत्रविषये श्रीमद्भगवद् गीतायां प्रथमश्लोकेपि प्राप्यते तत्रैव पाण्डवकौरवाणां विश्वप्रसिद्धमहाभारतयुद्धमभूत् ।अपि च क्षेत्रमिदं धर्मक्षेत्रमिति प्रथमश्लोके विद्यते । अर्वाचीन: चीनपरिव्राजकहुएन्सांमहांदयोपि अस्य क्षेत्रस्य विषयं चर्चा कृतवान् । तेनापि क्षेत्रस्यास्य धार्मिकदृष्ट्या पुण्यभूमिरिति प्रशंसा कृता । वनपर्वाणि वामनपुराणे तथा शल्यपर्वाणि पद्मपुराणे नारदीये क्षेत्रस्यास्य विषये चर्च्चा दृश्यते । वनपर्वाणि क्षेत्रस्यास्य विषये उच्यते यत्-

"ततो गच्छेत राजेन्द्र कुरुक्षेत्रमभिष्टुतम् ।

पापेभ्यो विप्रमुच्यन्ते सद् गता: सर्वजन्तव: ।।'

"कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहम् ।

य एवं सततं ब्रूयात् सर्वपापै: प्रमुच्यते ।।'

क्षेत्रस्यास्य विषये ईदृशी तुलना प्राप्यते यत्-'कुरुक्षेत्र समा गङ्गा' इति विभिन्नेषु पुराणेषु क्षेत्रस्यास्य विषये बहुनि वचनानि प्राप्यन्ते । अत: कुरुक्षेत्रं नितरामेव पुण्यतमं भवति ।

REFERENCE :

Dr.Atul Kumar Nanda(Book-"TIRTHASARASAMGRAHA")

Dr.Braja Kishor Swain(Book--"TIRTHAKSHETRANI")

Dr.Dayanidhi Mishra(Book-"PARASKYARAGRUHASUTRAM")